# न्यायवैशेषिकदर्शनसम्मतप्रमाणमीमांसा

माधवघिमिरे
उपप्राध्यापकः - न्यायविभागः
ने.सं.वि., वाल्मीकिविद्यापीठम्, काष्ठमण्डपो नेपालः
naman.sarma4@gmail.com

Article History : Received - 20 April 2026, Reviewed - 11 May 2026, Accepted - 17 June 2026
DOI : https://doi.org/10.3126/ss.v4i05.96264

## शोधसारः

तत्त्वप्रतिपादकवैदिकदर्शने परिगणितस्य गौतमीयन्यायदर्शनस्य कणादप्रणीतस्य वैशेषिकदर्शनस्य च प्रमाणप्रतिपादनसन्दर्भे मूलसिद्धान्तस्य तत्सम्बद्धविषयाणाञ्च गम्भीरान्वेषणपूर्वकं तत्सम्बद्धा मान्यतात्रोपन्यस्ता । प्रमाणपदार्थप्रतिपादकन्यायवैशेषिकदर्शनाभ्यां यथार्थज्ञानोपपत्तौ प्रमाणनामावश्यकत्वं प्रतिपाद्यते । तत्सिद्धान्तानुसारेण ज्ञातुर्ज्ञेयवस्तूनां स्वरूपपरिज्ञानाय प्रमाणतत्त्वस्यावश्यकता अपरिहार्या भवति । केवलं नैयायिकवैशेषिका एव न, अपि तु सर्वे दार्शनिकाः स्वस्वसिद्धान्तस्थापने प्रमाणस्यावश्यकतामवगम्य तज्ज्ञाने यत्नं विहितवन्तः । तत्र न्यायदर्शने प्रत्यक्षानुमानोपमानशब्दभेदेन चत्वारि प्रमाणानि स्वीकृतानि, वैशेषिकदर्शने तु उपमानशब्दयोः पृथक्प्रमाणत्वमस्वीकृत्य प्रत्यक्षानुमानप्रमाणाभ्यां व्यवहारः प्रवर्तत इति कृत्वा प्रमाणद्वयं स्पष्टं निरूपितम् । न्यायदर्शनोक्तचतुर्विधप्रमाणेषु प्रत्यक्षं निर्विकल्पकसविकल्पकोभयविधज्ञानसाधनम् । अनुमानं कार्यकारणभावानुरूपं लिङ्गलिङ्गिनः सम्बन्धज्ञानादप्रत्यक्षवस्तुनिश्चायकम् । उपमानं प्रसिद्धसाधर्म्यात् साध्यसाधनम्, अर्थादज्ञातवस्तुनो यज्ज्ञानं प्रसिद्धसादृश्योपन्यासेन सम्पद्यते तद् । शब्दस्त्वाप्तवाक्यजन्यः, अर्थाद् विश्वसनीयैर्वक्तृभिरुपदिष्टं यद्वचनं तत् शब्दप्रमाणम् । प्रमाणपदनिर्वचनपूर्वकमेतेषां प्रमाणानां स्वरूपसङ्ख्यादिविषये गभीरमध्ययनं विधाय विषयपरिचयः, प्रमाणविषयिकावधारणा केति समस्यानिदर्शनपूर्वकं तदुद्देश्यम्, सैद्धान्तिकपर्याधारः, शोधविधिरित्याद्यनुसन्धानाङ्गान्यवलम्ब्य च सविधि अयमालेखो निर्मितो वर्तते । अनेनालेखेन न्यायवैशेषिकदर्शनाध्येतॄणां कृते प्रमाणस्वरूपं स्पष्टीभवेदिति विश्वासः ।

**शब्दकुञ्जीः -** अनुमानम्, उपमानम्, प्रत्यक्षम्, प्रामाण्यम्, शब्दः ।

## विषयपरिचयः

व्यवहारनिरतस्य विवेकशीलस्य मानवस्य सर्वाण्यपि कार्याणि निश्चयपूर्वकानि भवन्ति । तेनैव मानवव्यवहारः सम्पद्यते । अतः सकलवस्तूनामिदमित्थमिति निश्चयार्थं प्रमाणस्य आवश्यकता भवति । सकलप्राणिषु श्रेष्ठो मनुष्यः प्रमाणानुरूपं वस्तुनिश्चयेनैव स्वकीयकार्याणि सम्पादयति । निश्चयरहितानि कर्माणि न केवलमभीष्टफलवर्जितानि, किन्तु अनिष्टफलप्रदान्यपि भवन्ति कदाचित् । अतस्तादृशकर्माणि गम्भीरदुःखकारणत्वेनोपतिष्ठन्ते । स्वभावतः सर्वे प्राणिनः

सर्वदा सुखमेवेच्छन्ति । तदर्थं यत्नवन्तश्च दृश्यन्ते । एतावता निश्चयात्मकप्रवृत्तये प्रमाणमावश्यकमित्यायातम् । अत एव न्यायभाष्यकारो वदति-*''प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्''* (वात्स्यायनः, १९९८, पृ.१) । अर्थात् प्रमाणेनार्थज्ञाने जाते प्रवृत्तिर्जायते, अतः प्रमाणं सार्थकमिति । पक्षप्रतिपक्षयोर्मध्ये विचारविमर्शेनार्थस्य निश्चयो यः क्रियते स एव निर्णय इति निगद्यते । तादृशस्य निर्णयस्य साधनभूतं प्रमाणमावश्यकम् । अतः सर्वे दार्शनिकाः स्वस्य सिद्धान्तस्य पुष्ट्यर्थं प्रमाणमनिवार्यं मन्यन्ते, तस्य च स्वरूपविषये सङ्ख्याविषये च स्वकीयसिद्धान्तानुसारं विमृशन्ति च । तत्र चार्वाकदर्शने प्रत्यक्षमेवैकं प्रमाणं स्वीकृतम् । बौद्धा वैशेषिकाश्च प्रत्यक्षेण सहानुमानमपि प्रमाणत्वेनाङ्गीकृतवन्तः । एवं सांख्याः कतिपयवेदान्तिनस्तथा केचन नैयायिकाः (भासर्वज्ञादयः) प्रत्यक्षानुमानाभ्यां सह शब्दमपि प्रमाणत्वेन स्वीकुर्वन्ति । ''मानाधीनाः मेयसिद्धिः'' इति नियममादाय प्रथमं तावत् प्रमाणानां समुद्घोषञ्चकार महर्षिर्गौतमः । तानि च प्रमाणानि प्रत्यक्षानुमानोपमानशब्दाख्यानि (न्या.सू.१।१।३) चत्वारीति सूत्रयामास । प्रमाणशास्त्ररूपेण प्रसिद्धं न्यायदर्शनं चत्वारि प्रमाणानि स्वीकुरुते । एतानि एव प्रमाणानि वात्स्यायनभाष्यकारेणापि विस्तरेण प्रतिपादितानि । अन्यदर्शनेषु स्वीकृता अर्थापत्त्यनुपलब्ध्यादयः प्रमाणविशेषाः नैयायिकैस्तु पृथक् प्रमाणत्वेन नाङ्गीकृताः; तानि चतुर्षु प्रमाणेष्वेव अन्तर्भाव्यन्ते । नव्यन्यायस्य प्रणेता आचार्यगङ्गेशोऽपि तत्त्वचिन्तामणौ न्यायसूत्रोक्तप्रमाणचतुष्टयस्यैव विशिष्टां चर्चां कृत्वान्येषां न्यायाभिमतपदार्थानां यथायोग्यमुपपादनं कृतवान् । नैयायिकानां मध्ये प्रसिद्धो विद्वानाचार्यो भासर्वज्ञो न्यायदर्शनप्रणयिनो गौतमात् परवर्तिभ्यश्च न्यायाचार्येभ्यो भिन्नं मतं स्थापितवान् स्वग्रन्थे न्यायभूषणे । सः प्रत्यक्ष-अनुमान-शब्दाख्यानि त्रीण्येव प्रमाणान्यनुमन्यते, उपमानस्य पृथक्प्रमाणत्वं नाङ्गीकुरुते । यद्यपि तस्य ग्रन्थस्य मूलं गौतमीयं न्यायसूत्रमेव । तस्य वचनम् - ''त्रिविधं प्रमाणं प्रत्यक्षमनुमानमागम इति'' (भासर्वज्ञः, २०२४ : पृ.११) । तथापि न्यायसूत्रकारः स्वयं चतुर्विधप्रमाणानि सूत्रे निर्दिष्टवान् । तदनन्तरकाले च सर्वे न्यायाचार्याश्चत्वारि प्रमाणान्येव विशेषतो निरूपितवन्तः । न्यायदर्शने प्रमाणचतुष्टयस्वीकारे न कश्चित् विवाद इति स्पष्टमवगम्यते । एवञ्च तच्छास्त्रानुयायिभिर्वात्स्यायनोद्योतकरवाचस्पतिमिश्रादिभिः प्रत्यक्षानुमानोपमानशब्दप्रमाणानां विवेचने महान् यत्नोऽकारि ।

पौरस्त्यदर्शनेष्वन्यतमं वैशेषिकदर्शनं पदार्थप्रतिपादनदृष्ट्या महत्त्वपूर्णमस्ति । न्यायदर्शनसदृशदर्शनं वैशेषिकं पदार्थप्रधानत्वाद् वैशेषिकस्य प्रमाणप्रधानत्वाच्च न्यायदर्शनस्य । तत्रापि न्यायवैशेषिकदर्शनयोः समानतन्त्रसिद्धत्वात् वैशेषिकैः परमाणुं जगदाधारतयाङ्गीकृत्य शब्दप्रमाणं विहाय प्रत्यक्षानुमानाभ्यामेव व्यवहारसम्पादनं सम्भवमिति मत्त्वा प्रमाणद्वयमेवाङ्गीकृतम् । यद्यपि नि ईयते-प्राप्यते विवक्षितार्थसिद्धिः येन इति व्युत्पत्त्या प्रत्यक्षादिप्रमाणान्येव न्यायशब्दप्रतिपाद्यानि तथापि भाष्यकारवात्स्यायनेन सोऽयं परमो न्यायः (न्या.भा.पृ. ९) इत्युक्त्वा परार्थानुमाने एव न्यायपदस्य तात्पर्यं प्रत्यपादि । अत एव न्यायभाष्यव्याख्यानावसरे विदुषा वाचस्पतिमिश्रेणापि -प्रत्यक्षादिप्रमाणमूलाः प्रतिज्ञादयः पञ्चावयवाः प्रामाणानि, तैरर्थस्य लिङ्गस्य परीक्षा परीक्षणम्, परीक्षितं तु लिङ्गं पञ्चावयवोपपन्नमनुमेयप्रत्ययफलं भावयत्येव (मिश्रः,१९९६: पृ.३५) इत्यभाणि । प्रत्यक्षागमाभ्यामीक्षितस्य अनु-पश्चादीक्षणम्=अन्वीक्षा, तत्प्रतिपादकं शास्त्रं आन्वीक्षिकी न्यायविद्या इत्युच्यते । अत्र तावदनयोर्न्यायवैशेषिकर्दशनयोः प्रमाणस्वरूपमादाय यथाशक्यं मीमांस्यते ।

**समस्यानिदर्शनम्**

न्यायवैशेषिकदर्शनोक्तप्रमाणानामध्ययनक्रमे कतिपयसन्देहा विलोकिताः । ते चाधो निर्दिष्टाः सन्ति ।

(क) प्रमाणशब्दस्य पारिभाषिकार्थः कः ?
(ख) चतुर्विधप्रमाणानां क्वोपयोगः ?
(ग) समानतन्त्रसिद्धयोर्न्यायवैशेषिकदर्शनयोः प्रमाणविषयिकावधारणा का ?

**उद्देश्यनिर्धारणम्**

न्यायवैशेषिकदर्शनोक्तप्रमाणानामध्ययनक्रमे उत्थिताः सन्देहा उपरि निदर्शिता । तत्रैव केन्द्रीभूय तत्समाधानमेवास्यालेखस्य मुख्यमुद्देश्यं वर्तते । यथा-

(क) प्रमाणशब्दस्य पारिभाषिकार्थनिदर्शनम् ।
(ख) चतुर्विधप्रमाणानामुपयोगप्रदर्शनम् ।
(ग) समानतन्त्रसिद्धयोर्न्यायवैशेषिकदर्शनयोः प्रमाणसम्बद्धविचारोपस्थापनम् ।

**पूर्वकार्यसमीक्षणम्**

न्यायवैशेषिकदर्शनोक्तप्रमाणमधिकृत्य प्राच्यैर्विद्वद्भिरनेके लेखा ग्रन्थाश्च प्रणीताः, परन्त्वेतेषां सूक्ष्मतयाध्ययने कतिपयन्यूनताः विलोकिताः, यासामपाकरणायायं लेखः सज्जीकृतः । न्यायवैशेषिकयोर्भाष्य-टीकाग्रन्थेषु प्रमाणसमन्वयस्य न्यूनता विलोक्यते । तथैव प्रमाणमादाय सूक्ष्मतया विचारे वात्स्यायनभाष्यप्रशस्तपादभाष्ययोः तुलनात्मकविवेचनस्याभावोऽपि दृश्यते । उभयोर्दर्शनयोः समानतन्त्रत्वेऽपि प्रमाणसङ्ख्याविषये महान् भेदः परिलक्ष्यते । न्यायमते प्रत्यक्षादीनि चत्वारि प्रमाणान्यभ्युपगतानि, वैशेषिकमते च प्रत्यक्षानुमानलक्षणे द्वे ह्येव । प्राक्तनैः टीकाकारैर्व्योमशिव-श्रीधराचार्य-उदयनादिभिः स्वाभिप्रायो वर्णितः, किन्तु न्यायभाष्यस्य वैशेषिकभाष्येण सह साक्षात् प्रमाणगतविरोधस्य परिहारप्रक्रिया, वैशेषिकोक्तस्य शब्दस्यानुमानेऽन्तर्भावस्य च प्रकारश्चैकस्मिन् ग्रन्थे क्रमेण न विमृष्टः । एवमेव महामहोपाध्याय-फणिभूषण-तर्कवागीशमहोदयेन स्वकृते न्यायपरिचयप्रभृतिग्रन्थे न्यायसूत्रस्य बङ्गीयव्याख्याने प्रमाणानां विवेचनं (तर्कवागीशः,१९६८:पृ.१४१) विहितम् । परन्त्वत्र विचारसरणिः केवलं न्यायपरम्पराश्रिता जाता, वैशेषिकसम्मतपदार्थानां प्रमाणैः सह यः प्रामाणिकः सम्बन्धः सः समुपेक्षितः। यथा समवायस्य प्रत्यक्षीकरणे संयुक्तसमवायादिसन्निकर्षाणां वैशेषिकोक्तविशेषणविशेष्यभावसन्निकर्षेण सह विरोधपरिहार इत्यादिविषया न तत्र सूक्ष्मतया विचारिताः । साम्प्रतिकैः शोधकृद्भिर्न्यायवैशेषिकदर्शनोक्तप्रमाणमीमांसामाश्रित्य ये प्रबन्धाः विरचिताः, तेषु प्रायशः तर्कसङ्ग्रह-मुक्तावल्यादिपाठ्यपुस्तकीयपद्धतिमनुसृत्यैव प्रमाणलक्षणानि पिष्टपेषणवदुपस्थापितानि । तैस्तैर्लेखकैश्चिन्तकैश्च मूललग्रन्थोक्तविषयस्य न्यूनताः प्रामाणिकरूपेण न चिन्तिताः, तथैव इतः प्राग्जातेषु लेखेष्वनुसन्धानेषु वा न्याय-वैशेषिकयोः प्रमाणमादाय तुलनात्मिका सरणिर्नाङ्गीकृता । न्यायमते प्रमाणानि प्रमेयसाधकानि, वैशेषिकमते च प्रमेयाधीनानि प्रमाणानि इति यः सैद्धान्तिको भेदः, तमुपजीव्याद्यापि कोऽपि स्वतन्त्रो लेखो न प्रायेण दृष्टः । अतो मूलस्रोतभूतानां ग्रन्थानां साक्ष्येणास्य रिक्तस्थानस्य पूरणमेवास्य लेखस्य मुख्यं लक्ष्यमस्ति ।

**अध्ययनविधिः**

अनुसन्धानविषयस्य सूक्ष्मविश्लेषणं विधाय तत्तद्वस्तुस्वरूपप्रतिपादनाय अध्ययनविधिरनिवार्यो भवति । अतोऽस्मिन् लेखे सामग्रीसङ्कलनसमये प्राथमिकस्रोतत्वेन अस्य दर्शनस्य मूलग्रन्थाः, द्वितीयकस्रोतत्वेन तदुपरि तासां टीकाः

उपटीकाग्रन्थाश्चावलम्बिताः । एते ग्रन्थाः पुस्तकालयीयाध्ययनविधिनोपयोगिनस्सन्तो विषयव्याख्याने विश्लेषणे तन्निष्कर्षप्रदाने च सहायकास्समभवन् । अध्ययनविश्लेषणसन्दर्भे समीक्षात्मको विधिरवलम्बितः ।

**सैद्धान्तिकपर्याधारः; सीमाङ्कनञ्च**

अस्मिन्नालेखे न्यायवैशेषिकदर्शनयोर्मूलसिद्धान्तप्रतिपादका ग्रन्था गहनतयाधीत्य तदाधारेण विषया विश्लेषिताः । विशेषतः तेषां तेषां ग्रन्थानां प्रमाणविवेचनं सूक्ष्मतया विचिन्त्य लेखोऽयं व्यवस्थापितः । अत एव न्यायवैशेषिकदर्शनसम्बद्धा ग्रन्था एवास्य लेखस्य सैद्धान्तिकाधारत्वेन वर्तन्ते । एतदुभयदर्शनोक्तप्रमाणसम्बद्धसिद्धान्तमीमांसा एव अस्य लेखस्य सीमा वर्तते । तत्रापि विशेषतो न्यायसूत्राणि, न्यायभाष्यम्, तर्कसंग्रहः, न्यायसिद्धान्तमुक्तावली, वैशेषिकसूत्राणि, प्रशस्तपादभाष्यम्, न्यायकन्दली, तर्कभाषा चेत्यादयो ग्रन्था मुख्यतः परिगृहीताः । उभयदर्शनाभिमतप्रमाणस्वरूपसङ्ख्यादीनां सम्यक् चिन्तनं कृत्वा निष्कर्षा उपनिबद्धाः । अस्य लेखस्य स्वरूपनिर्माणे एपिए इत्याख्या प्रचलिता लेखनपद्धतिश्चावलम्बिता ।

**प्रमाणमीमांसा**

समेषां सामान्यविशेषविषयाणां निर्धारणार्थं प्रमाणस्यापेक्षावश्यं भवति । प्रमाणशब्दः प्रोपसर्गपूर्वकाद् माङ्(माने)धातोर्ल्युट्प्रत्यये, अनादेशे च निष्पद्यते । स च ल्युट्प्रत्ययः भावे करणे चार्थे भवति । यद्यपि 'कृत्यल्युटो बहुलम्' इति सूत्रबलात् कदाचित् कर्तृकर्मादिष्वर्थेष्वपि भवितुं शक्नोति स च ल्युट्प्रत्ययः । प्रमिणोति यत्, तत् प्रमाणम् (कर्तरि) । प्रमीयते यत्तत्प्रमाणम् (कर्मणि) । प्रमीयतेऽनेनेति प्रमाणम् (करणे) । प्रमीयतेऽस्मा इति प्रमाणम् (सम्प्रदाने)। प्रमीयतेऽस्मादिति प्रमाणम् (अपादाने) । प्रमीयतेऽस्मिन्निति प्रमाणम् (अधिकरणे) इति । एवं सत्यपि दर्शनक्षेत्रे एतत्पदं प्रायोऽर्थद्वयमभिधत्ते- करणार्थं भावार्थञ्च । तत्रापि दर्शनेषु प्रमाकरणमिति करणार्थे प्रमाणपदमाधिक्येन प्रयुज्यमानं वर्तते । एवञ्च प्रमा = प्रमितिरेव प्रमाणमथवा प्रमीयते येन तत् प्रमाणम्, प्रमाकरणमित्यर्थ आयाति । न्यायदर्शनानुयायिभिः प्रमीयते अनेन इति प्रमायाः करणमिति वा व्युत्पत्त्या व्युत्पादितः प्रमाणशब्दः । भावल्युटा क्वचित् प्रमाणपदं प्रमित्यर्थकम् । प्रमाणप्रमेयेत्यादिसूत्रे तु प्रमाणपदं प्रमितिकरणबोधकम् । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि (न्या. सू.१।१।३) इति सूत्रेऽपि तथैव । तत्र जरन्नैयायिकेन जयन्तभट्टेन समवहितसामग्रीणामेव प्रमाणत्वमभिहितम् (भट्टः,२०३९: पृ.२०) । अतो व्यापारवद् कारणं करणमिति पक्षे प्रत्यक्षे इन्द्रियाणाम्, अनुमितौ व्याप्तिज्ञानस्य, उपमितौ सादृश्यज्ञानस्य, शाब्दबोधे पदज्ञानस्य करणत्वमायाति । सम्यगनुभवसाधनं प्रमाणमिति तात्पर्यटीकाकारेण मिश्रमहोदयेनापि विवृतम् । उदयनाचार्यस्तु- यथार्थानुभवो मानमनपेक्षतयेष्यते इत्याह (न्या.कु.४।१) । न्यायदर्शने प्रत्यक्षानुमानोपमानशब्दाख्यानि चत्वारि प्रमाणानि । समानतन्त्रसिद्धेन वैशेषिकेन तु एतेन 'शाब्दं व्याख्यातम्' (वै.सू.९।१।३) इत्यादिना शब्दोपमानयोरनुमानेऽन्तर्भावो विहितः । न्यायैकदेशिना भासर्वज्ञेनाप्युपमानं हातम् ।

**प्रत्यक्षप्रमाणमीमांसा**

किं तावत् प्रत्यक्षप्रमाणलक्षणमिति जिज्ञासायां न्यायसूत्रे 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्' इति प्रत्यक्षप्रमाणलक्षणमुक्तम् (न्या. सू.१।१।४) । "अक्षस्य अक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्षम्" (वात्स्यायन,१९९८ :पृ.१७) इति । अर्थाच्चक्षुरादीनामिन्द्रियाणां स्वस्वविषये (रूपादौ) या वृत्तिः, संयोगो वा

तत्प्रत्यक्षम् । तदेव प्रत्यक्षज्ञानस्य साधनं प्रत्यक्षप्रमाणम् । अर्थाद् यस्मात् प्रत्यक्षज्ञानं जायते, तत् करणं प्रत्यक्षप्रमाणम्— "प्रत्यक्षज्ञानकरणं प्रत्यक्षम्" (भट्टः, २००३: पृ .७७) इति । चाक्षुषादिप्रत्यक्षानुभवेषु यद् व्यापारकारणं दृश्यते, तदेव असाधारणकारणमिन्द्रियम् । प्रत्यक्षज्ञानोपायभूतानीन्द्रियाणि षट्-चक्षुः, रसना, घ्राणम्, श्रोत्रम्, त्वक्, मनश्चेति । अत्र पञ्च बाह्यानि, मनस्त्वन्तरिन्द्रियं भवति । तस्मात् प्रत्यक्षज्ञानमपि करणभेदेन चाक्षुष-रासन-घ्राण-श्रौत्र-त्वाच-मानस इति षड्विधं भवति । आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन इति संयोगत्रयाज्ज्ञानोत्पत्तिः । अक्षस्य प्रतिविषयं वृत्तिरिति न्यायभाष्यस्थवृत्तिपदस्य सन्निकर्षपरतया व्याख्यानाद् विषयेन्द्रियसन्निकर्षस्यैव प्रत्यक्षप्रमितेः करणत्वं सिद्ध्यतीत्यर्वाचीनाः । नैयायिकैरीश्वरस्यापि प्रत्यक्षप्रमा भवत्येवेति कृत्वा पाक्षिकतया ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति लक्षणान्तरमपि विहितम् । न चेदीश्वरस्य लोकसाक्षित्वहानिरापद्येत ।
नैयायिकानामयमभिप्रायः-परमात्मा अशरीरः, तस्येन्द्रियस्याविद्यमानत्वात्, अतो गौतमसूत्रोक्तं लक्षणमत्र नैव सङ्गच्छते । प्रत्यक्षे इन्द्रियस्यैव करणत्वम्, अनुमित्यादिषु च करणस्य ज्ञानद्वारोपयोग इति प्रत्यक्षे इन्द्रियज्ञानस्यानपेक्षितत्वेन ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति लक्षणान्तरमभिहितम् । तथा च प्रत्यक्षे इन्द्रियस्य, अनुमितौ परामर्शस्य, उपमितौ अतिदेशवाक्यार्थस्मरणस्य, शाब्दबोधे च पदजन्यपदार्थोपस्थितेः करणत्वमायाति । उद्योतकरवाचस्पतिमिश्रादिभिर्नैयायिकैरप्येतेषामेव प्रमाकरणत्वमुक्तम् । न च इन्द्रियादीनां करणत्वं व्याहतमिति वाच्यम्, व्यापारवद् असाधारणकारणं करणमित्यर्थकरणेन इन्द्रियादीनामपि प्रत्यक्षकरणत्वमायाति । प्रतिगतमक्षं प्रत्यक्षमिति कुगतिप्रादयः (पा.सू.२।२।१८) इति सूत्रेण प्रादिसमासनिष्पन्नं प्रत्यक्षपदं प्रत्यक्षप्रमित्यर्थमभिधत्ते । न्यायमते निर्विकल्पकसविकल्पकभेदात् द्विविधं प्रत्यक्षम् । विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वात् प्रथमं चक्षुःसंयोगानन्तरं घट इत्याकारकं घटत्वादिविशिष्टविषयकं ज्ञानं न संभवति । तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं जायते तदेव निर्विकल्पकमित्युच्यते (भट्टाचार्यः, २००३: पृ.२२२) । अतः प्रकारताशून्यज्ञानत्वं निर्विकल्पकत्वमित्युच्यते । सविकल्पकज्ञाने त्रिविधा विषयता भवति-प्रकारताख्यविषयता, विशेष्यताख्यविषयता, संसर्गताख्यविषयता । निर्विकल्पकज्ञानं तु विशेष्यविशेषणसंसर्गभावविलक्षणतुरीयविषयताकं स्वीक्रियते (न्या.बो.पृ.३३ ) । न्यायदर्शनेन संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति षड्विधः सन्निकर्षः व्याख्यातः (भट्टाचार्यः, २०६८ : श्लो. ५९, ६०) ।

वैशेषिकसूत्रे यद्यपि साक्षात् प्रत्यक्षस्य लक्षणं नोपलभ्यते तथापि 'आत्मेन्द्रियार्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्' (३।१।१८) इति सूत्रस्य आत्मेन्द्रियार्थसन्निकर्षेभ्यः यद् ज्ञानं जायते तदनुमानादिभ्यः पृथक् इत्यर्थाभिधानात् तद्धि प्रत्यक्षं सिद्ध्यतीति विद्वांसो विवेचयन्ति । प्रत्यक्षलक्षणं प्रशस्तपाद इत्थम् आह- तत्राक्षमक्षं प्रतीत्योत्पद्यत इति प्रत्यक्षम् । अक्षाणीन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि षट् । तद्धि द्रव्यादिषु पदार्थेषूत्पद्यते । द्रव्ये तावत् त्रिविधे महत्यनेकद्रव्यवत्त्वोद्भूतरूपप्रकाशचतुष्टयसन्निकर्षाद् धर्मादिसामर्ग्ये च स्वरूपालोचनमात्रम् । सामान्यविशेषद्रव्यगुणकर्मविशेषणापेक्षादात्ममनः सन्निकर्षात् प्रत्यक्षमुत्पद्यते । इति । उपर्युक्ते प्रत्यक्षलक्षणसन्दर्भे सकलेन्द्रियक्रोडीकरणार्थमक्षशब्दस्य वीप्सेति व्योमशिवाचार्यस्तद्व्याख्याने वदति । यथाअक्षमिति वीप्साविधानं सकलेन्द्रियावरोधार्थम् (व्योमशिवाचार्यः, १९८४: पृ.१३७) । बाह्यमान्तरिकोभयविधेन्द्रियग्रहणे अत्र सकलशब्दस्य तात्पर्यम् । तत्र सामान्यविशेषेषु स्वरूपालोचनमात्रं प्रत्यक्षं प्रमाणमित्युक्तम् (प्रशस्तपादाचार्यः, २०७८ : पृ.२८५ ) कदाचित् इन्द्रियम्, कदाचिद् सन्निकर्षः कदाचित् ज्ञानं करणं भवतीति विषयोऽयं केशवमिश्रेण तर्कभाषाग्रन्थे (मिश्रः, २००३: पृ.६०) प्रतिपादितः । एतावता प्रमाणेषु ज्येष्ठं प्रत्यक्षं यथाशक्यं निरूपितम् । इतः परमनुमानं निरूप्यते ।

**अनुमानप्रमाणमीमांसा**

अनुमीयते अनेन इति करणव्युत्पत्त्या अनुमानपदेन अनुमितिकरणमेवार्थो ज्ञायते । तत्र प्रत्यक्षमुपजीव्यमनुमानञ्चोपजीवकम् । प्राचीनैः नैयायिकैः परामर्श एव अनुमानमित्युक्तम् । व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श इत्युच्यते (भट्टः, २००३ : पृ.४०) । व्याप्तिविशिष्टञ्च तद् पक्षधर्मताज्ञानमिति कर्मधारयसमासः । अत्र विशिष्टपदस्य प्रकारतानिरूपकपरत्वात् पक्षधर्मतायाः ज्ञानमित्यत्र षष्ठ्या विषयत्वबोधनाद् धर्मतापदस्य सम्बन्धार्थकत्वात् कर्मधारयसमासेन समस्यमानपदार्थयोरभेदसंसर्गलाभाच्च व्याप्तिप्रकारकाभिन्नं यत्पक्षसम्बन्धिविषयकं ज्ञानं तत् परामर्श इत्यर्थो लभ्यत इति न्यायबोधिन्यामुक्तम् (न्या. बो.पृ.४०) । एवं सति व्याप्तिः का इति प्रश्ने साधारणतया साहचर्यनियमो व्याप्तिरित्युक्तम् । व्याप्तिविषये नैयायिकानां वैशेषिकानामस्ति च मतभेदः। लीलावतीकारः कार्त्स्न्येन साध्यसाधनाभावो व्याप्तिः (वल्लभाचार्यः, १९८४ : पृ४९८) इत्युक्तवान् । स्वाभाविकसम्बन्धो व्याप्तिरिति केषाञ्चन मतम् । अव्यभिचरितसम्बन्धो व्याप्तिरिति कस्यचिन्मतम् । उदयनाचार्यस्तु अनौपाधिकसम्बन्धो व्याप्तिरित्युक्तवान् । व्याप्तिज्ञानमात्रेण अथवा पक्षधर्मताज्ञानमात्रेण नानुमितिरुत्पद्यते । यद्यपि व्याप्तिज्ञानं पक्षधर्मताज्ञानञ्चोभयमनुमानं प्रति कारणमिति स्वीकर्तुं शक्यते तथापि कार्यरूपानुमितेरुत्पत्तौ पूर्वं परामर्शाख्यो व्यापार आश्रयणीयः, यस्याभावे निस्सन्देहतयानुमितेरुत्पत्तिर्न स्यात् । अनुमाने च परम्परया व्याप्तेः प्रत्यक्षं व्याप्तिस्मरणद्वारा उपजीव्यं भवति । चिन्तामणिकृतापि "तत्करणमनुमानम्, तच्च लिङ्गपरामर्शः"(त.चि.पृ.८०) इत्युक्त्वा प्रथमतो लिङ्गपरामर्शस्यानुमानत्वं स्वीकृतम् । तत्र लीनम्.परोक्षम्, अर्थं गमयतीति व्युत्पत्या लिङ्गशब्दः परोक्षार्थस्य बोधकः । व्यापारवत् कारणमेव करणमित्याशयेन व्याप्तिज्ञानस्यैव परामर्शद्वारा अनुमितिकरणत्वं स्वीकृतमिति प्रागेवोक्तम् । व्याप्तिज्ञानस्यानुमानत्वपक्षे तस्य सहचारप्रत्यक्षजन्यत्वेन प्रत्यक्षोपजीवकत्वं भवति । यदि तावदनुमानपदं भावसाधनं स्यात् तदा तस्यानुमितिरेवार्थः । तत्र च प्रात्यक्षिकपरामर्शादिरनुमितावुपजीव्यत्वेनानुमितेरपि प्रत्यक्षजन्यत्वं सिद्ध्यति । गौतमेन तत्पूर्वकं त्रिविधमनुमानमिति सूत्रे उक्तं तदिति पदमिन्द्रियार्थसन्निकर्षोत्पन्नमित्यादिसूत्रोक्तं प्रत्यक्षमेव परामृशति । तत्पूर्वकं त्रिविधमनुमानं- पूर्ववत् शेषवत् सामान्यतो दृष्टञ्चेति अनुमानविभागसूत्रे (न्या.सू१।१।५) कारणमूलकम्, कार्यमूलकम्, अन्यमूलकञ्चेति त्रिविधलिङ्गकमनुमानं भाष्यकारसम्मतम् । वार्तिककारेण तु पूर्ववदिति पदेन केवलान्वय्यनुमानम्, शेषवदित्यनेन केवलव्यतिरेक्यनुमानम्, सामान्यतो दृष्टमित्यनेन चान्वयव्यतिरेक्यनुमानं व्याख्यातम् ( न्या.वा.पृ.३० )। वैशेषिकैर्लिङ्गस्य रूपत्रयं स्वीकृतम्(प्र.भा.पृ.२८९) । तद्यथा-पक्षसत्त्वम्, सपक्षसत्त्वम्, विपक्षेऽसत्त्वञ्च । अबाधितविषयत्वमसत्प्रतिपक्षत्वमपि हेतावपेक्षितमिति नैयायिकाः । न्यायमते तदेतदनुमानं द्विविधम्- स्वार्थं परार्थञ्च । वैशेषिके तु दृष्टं सामान्यतोदृष्टमिति भेदेन द्विविधं वर्तते । लिङ्गेन सह साहचर्यदर्शनेन यदनुमीयते तदेव दृष्टानुमानम् । यधा धूमदर्शनेन वह्नेरनुमानम् । श्रीधरभट्टेन यथाह न्यायकन्दल्याम्-प्रसिद्धं यत् पूर्वं लिङ्गेन सह दृष्टं साध्यं यत् सम्प्रत्यनुमेयं तयोरत्यन्तजात्यभेदे सति यदनुमानं तत् दृष्टम् (भट्टः, १९९७ : पृ.५०८ ) । एतावता प्रत्यक्षतो ज्ञातस्यानुमानं दृष्टानुमानमित्यायातम् । तथैव यस्यानुमानं क्रियते तदप्रत्यक्षे सति तत्सदृशवस्तुप्रत्यक्षमाधारीकृत्य यदनुमानं तत् सामान्यतोदृष्टानुमानम् । यथा कर्षकस्य प्रवृत्तेः फलं शस्यादिकम् तथैव वर्णश्रमिणाञ्च प्रवृत्तेः फलं स्वर्गादिकमित्यनुमीयते (तत्रैव, पृ.५०९) । न्यायमतानुसारं तु स्वार्थपरार्थभेदेन द्विविधमनुमानमुक्तम् । तथा हि कश्चन महानसादौ वह्निधूमयोः साहचर्यं गृहीत्वा पार्वत्यप्रदेशं गतः । तत्र च वह्नौ सन्दिहानोऽतिदूरमविच्छिन्नमूलां धूमरेखां पश्यन् पूर्वानुभूतां वह्निधूमयोः साहचर्यनियमाख्यां व्याप्तिं स्मरति । तेन च स्मरणेन वह्निव्याप्यधूमवान् पर्वत इति विशिष्टवैशिष्ट्यावगाहि ज्ञानं जायते

तदेव लिङ्गपरामर्श उच्यते । ततश्च तस्य पुरुषस्य पर्वतो वह्निमान् इति अवधारणात्मकं ज्ञानं जायते । सैवानुमितिरित्युच्यते । सेयं स्वार्थानुमितिः, तत्करणञ्च स्वर्थानुमानमित्युच्यते । अस्याञ्चानुमितौ पक्षतापि कारणम् । सा च पक्षता प्राचीननैयायिकानां मते सन्दिग्धसाध्यधर्मवत्वम् । नव्यानां तु सिषाधयिषाविरहसहकृतसिद्धेरभाव । पक्षतासत्त्वे सिद्धौ सत्यामपि अनुमितिर्भवति । स्वयं धूमादिलिङ्गेन पर्वतादौ वह्निं निश्चित्य परस्यानुमित्यर्थं यदनुमानं तदेव परार्थानुमानम् । परार्थानुमाने प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयववाक्यानि प्रयुज्यन्ते । एते चावयवाः प्रत्यक्षादिप्रमाणचतुष्टयमुपजीव्य प्रवर्तन्ते । तत्रागममूलकं प्रतिज्ञावाक्यम् । अनुमानमूलकं हेतुवाक्यम् । प्रत्यक्षमूलकमुदाहरणवाक्यम् । उपमानप्रमाणमूलकञ्च उपनयवाक्यम् । निगमनन्तु प्रमाणचतुष्टयमुपजीव्यैव प्रवर्तते । अत एवोक्तं न्यायभाष्ये- आगमः प्रतिज्ञा, हेतुरनुमानम्, उदाहरणं प्रत्यक्षम्, उपनयमुपमानम्, सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनम् (न्या. भा.पृ.९) इति । असद्धेतुस्तु हेत्वाभासत्वेन परिगण्यते । वैशेषिकैः त्रयो हेत्वाभासा उक्ताः । यथा पदार्थधर्मसंग्रहे -विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपो ब्रवीत् (प्रशस्तपादाचार्यः, २०७८ : पृ. ५६४) इति । नैयायिकैः पञ्च हेत्वाभासाः स्वीकृता । यथाह गौतमः-सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीताः हेत्वाभासा (न्या सू.१।२।४) इति । न्यायमते केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् लिङ्गं त्रिविधम् । एतावता निरूपितमनुमानम् ।

अथोपमानं निरूप्यते-

**उपमानप्रमाणमीमांसा**

अस्ति च तावत् नैयायिकसम्मतमुपमानम् । उपमीयते अनेन इति करणव्युत्पत्या सादृश्यमाध्यमेन यज्ज्ञानं जायते तदेवोपमिति । तत्करणमुपमानम् । प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् (न्या.सू.१।१।६)इति गौतमीयसूत्रात् अपि सादृश्यज्ञानस्य करणत्वं प्रतीयते । तथा च गोसदृशो गवयपदवाच्य इति आरण्यकपुरुषस्यातिदेशवाक्यश्रवणसमनन्तरं ग्रामीणस्य गोसदृशो गवयपदवाच्य इति शाब्दज्ञानं जायते । तदनन्तरं कालान्तरे वनं गतस्य तस्य गवयादौ यत् गोसादृश्यप्रत्यक्षं जायते तेन च पूर्वानुभूतवाक्यार्थस्मृतिरुत्पद्यते । ततश्च गवयो गवयपदवाच्य इति ज्ञानमुत्पद्यते । सैवोपमितिः । तत्करणं सादृश्यज्ञानम् । तदेवोपमानम् ।

परन्तु वैशेषिकैरुपमानं पृथक् प्रमाणतया नाङ्गीकृतम् । प्रत्यक्षेऽनुमाने च तस्यान्तर्भावो विहितः । व्योमवतीकारस्तु सगोत्रीयेभ्योऽपि किञ्चिद् भिन्नं मतं स्थापितवान् । एतन्मते न खलु शब्दस्यानुमाने अन्तर्भावः, यच्चोक्तम्-शब्दानुमाने अन्तर्भवतीति केचित्, अन्ये तु प्रमाणान्तरमिति वैशेषिकाणां विप्रतिपत्तिस्तेनेहानभिधानम् (व्योमशिवाचार्यः, १९८४ : पृ.१३७ ) इति । तदनन्तरं शब्दस्याप्तोक्तेन प्रमाण्यान्नानुमाने अन्तर्भाव (तत्रैव, पृ.१७१) इति दर्शितम् । अन्येषां वैशेषिकानां मते तु अनुमाने तदन्तर्भावप्रकारस्त्वित्थम्-गवयशब्दो गवयवाचकः, असति वृत्त्यन्तरे शिष्टैस्तत्र प्रयुज्यमानत्वादिति । अर्थापत्तिरपि पृथक् प्रमाणत्वं न भजते । तस्यानुमानेऽन्तर्भावः । अभावोऽपि न प्रमाणम् । अभावाख्यस्य पदार्थस्यानभ्युपगमाद् तद्विषयकाभावप्रमाणस्याप्यभाव एवेति नैयायिकाः । एतावता निरूपितमुपमानम् । अथ शब्दप्रमाणं निरूप्यते ।

**शब्दप्रमाणमीमांसा**

न्यायदर्शनेन शब्दः पृथक् प्रमाणत्वेन प्रतिपादितः । न्यायसूत्रे आप्तोपदेशः शब्दः (न्या.सू.१।१।७) इति शब्दलक्षणमुक्तम् । ‘उपदिश्यतेऽनेनेत्युपदेशः’ इति व्युत्पत्त्या सिद्धेन उपदेशपदेन वाक्यज्ञानं वाक्यार्थज्ञानञ्चेत्येतदर्थद्वयमभिधीयते ।

आप्तानामुपदेशः शब्दप्रमाणमिति तात्पर्यम् । न्यायभाष्यकारः सूत्रोक्ताप्तपदस्य व्याख्यानमित्थं चकार-“आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा । साक्षात्करणमर्थस्य आप्तिः, तया प्रवर्तत इत्याप्तः” (वात्स्यायनः, १९९८: पृ.२७-२८) इति । तथा च सुदृढेन प्रमाणेनावधारिताः=साक्षात्कृता धर्माः=हिताहितप्राप्तिपरिहारप्रयोजनाः पदार्थाः, यैस्ते जना आप्ताः कथ्यन्ते । तेषामुपदेशः=आप्तोपदेशः, तैरुच्चरितमाकाङ्क्षायोग्यतासत्तियुक्तं पदसमूहात्मकं वाक्यं शब्द इति शब्दप्रमाणस्य लक्षणम् । तर्कसङ्ग्रहेऽपि आप्तस्तु यथार्थवक्ता, ईश्वरोक्तत्वात् वेदाः पौरुषेयाः, अस्मात् पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः, शक्तं पदमित्युक्तम् (अन्नंभट्टः,२००३ : पृ.६२)।

न्यायवैशेषिकदर्शनयोः समानतन्त्रत्वेऽपि प्रमाणमीमांसायां शब्दप्रमाणस्य स्वातन्त्र्यविषये महती वैचारिकी विप्रतिपत्तिर्वर्तते । यत्र न्यायदर्शनं शब्दं पृथक्प्रमाणत्वेनाङ्गीकरोति, तत्र वैशेषिकदर्शनं तदनुयायिनश्च शब्दस्य पृथक्प्रमाणत्वं निराकृत्य तस्यानुमान एवेदमित्थन्तयान्तर्भावं समर्थयन्ति । अमुमेव पक्षं सुस्पष्टं कुर्वाणः प्रशस्तपादभाष्यकार आचार्यप्रशस्तपादः स्पष्टमुद्घोषयति-"शब्दादीनामप्यनुमानेऽन्तर्भावः, समानविधित्वाद्" (प्रशस्तपादाचार्यः,२०७८ : पृ.३०५) इति । अस्या भाष्योक्तेः तात्पर्यार्थोऽयं यद् यया प्रक्रिययानुमित्यात्मकं ज्ञानं जायते, तयैव प्रक्रियया शाब्दज्ञानमपि सम्पद्यते, अत उभयोः प्रक्रियागतं सादृश्यं (समानविधित्वम्) वर्तते । एतदेव प्रपञ्चयितुं भाष्यकृता पुनः प्रतिपादितं यत्- "यथा प्रसिद्धसमयस्यासन्दिग्धलिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्या-मतीन्द्रियेऽर्थेऽनुमानं भवति तथैव शब्दादिभ्योऽपि" (पूर्ववत्) इति । अस्योपपत्तिरेवं रीत्या क्रियते- अनुमानप्रमाणं तावद् व्याप्तिज्ञानपुरस्सरमेव प्रवर्तते । यत्र यत्र धूमस्तत्र तत्र वह्निरिति साहचर्यनियमं (व्याप्तिम्) स्मृत्वैव पुरुषो धूमाग्न्योः सम्बन्धं निश्चिनोति तथैव शब्दस्याप्यर्थप्रतिपादकता न स्वतः सिद्ध्यति, अपि त्वत्र संकेतात्मिका व्याप्तिरपेक्षिता भवति । अयं शब्दोऽमुमर्थं बोधयतीति योऽस्माकं पूर्वसङ्केतः (समयः) वर्तते, स एव व्याप्तिरूपः। यदि शब्दो व्याप्तिनिरपेक्षो भवेत् तर्हि अपरिचितया भाषया उच्चारिताः शब्दा अप्यर्थबोधं जनयेयुः, न च तथा दृश्यते । अतः शब्दादप्यर्थज्ञानं व्याप्तिस्मरणबलेनैव जायत इति हेतोः तस्यानुमानत्वं निष्प्रत्यूहमिति वैशेषिकाः ।

तत्प्रयोगसाधकमनुमानञ्चेत्थं दर्श्यते "शब्दोऽनुमानगतार्थः, व्याप्तिबलेनार्थप्रतिपादकत्वात्, धूमवत् " इति । यथा धूमो व्याप्तिबलेनाप्रत्यक्षं वह्निं गमयति, तथैव उच्चारितः शब्दोऽपि सङ्केतरूपां व्याप्तिमाश्रित्यैवातीन्द्रियमपि बाह्यार्थं प्रतिपादयति । अत्र व्याप्तिबलेनार्थप्रतिपादकत्वं नाम यो हेतुः, स शब्दधूमयोः समानरूपेण वर्तते । यथा धूमदर्शनाद् वह्नेरनुमितिः, तथैवाप्तवाक्यजन्यपदश्रवणाद् वाक्यार्थस्यानुमितिर्भवति । वैशेषिकमते वेदानां वाक्यसमूहानां वा प्रामाण्यं तदुच्चारयितुराप्तत्वेन (ईश्वरस्य भ्रमादिरहितत्वेन) सिद्ध्यति । 'एतानि पदानि यथार्थसम्बन्धवन्ति, आप्तोक्तत्वात्' इत्येवंरूपेणाप्तवचनस्याप्यनुमानकोटावेव प्रवेशो भवति । तस्माद् लिङ्गदर्शनव्याप्तिस्मरण-पक्षधर्मताज्ञानादि-सामग्रीणां शब्दार्थबोधेऽप्यनिवार्यत्वात् शब्दो न पृथक् प्रमाणम्,अपि त्वनुमानप्रमाणस्यैव प्रपञ्चभूतेति वैशेषिकाः कथयन्ति ।

**प्रामाण्यमीमांसा**

प्राच्यदर्शनेषु ज्ञानस्य प्रामाण्याप्रामाण्यविषयमादाय महान् विमर्शो वर्तते । उपरि प्रतिपादितानां समेषां प्रमाणानां प्रामाण्याप्रामाण्ये च परत इति नैयायिका निगदन्ति । तत्र न्यायवैशेषिकदर्शनस्य अयमभ्युपगमो यत् ज्ञानस्य प्रामाण्यमप्रामाण्यं परत एव भवतीति। प्रामाण्यसन्दर्भे ह्युत्पत्तौ ज्ञप्तौ च स्वतस्त्वपरतस्त्वविचारः प्रवर्तते।

**उत्पत्तौ परतः प्रामाण्यम्**

नैयायिकानां मते ज्ञानं स्वरूपतः केवलं विषयं प्रकाशयति। तस्मिन् ज्ञाने प्रामाण्यं स्वतो नोत्पद्यते। यदा ज्ञानस्य कारणेषु इन्द्रियसन्निकर्षादिषु गुणा भवन्ति तदा एव प्रमा अर्थाद् यथार्थज्ञानमुत्पद्यते। यथा चक्षुरिन्द्रियस्य नैर्मल्यं समीचीनत्वं वा गुणः, तेन यथार्थज्ञानं जायते। यदा कारणेषु दोषाः (कामलादिदोषाः) भवन्ति, तदा अप्रमा (भ्रमात्मकं ज्ञानम्) जायते। एतावता प्रामाण्यं स्वाश्रयसामग्रीतो भिन्नं गुणरूपं कारणमपेक्षत इत्यतो ह्युत्पत्तौ परतस्त्वम्।

**ज्ञप्तौ परतः प्रामाण्यम्**

जातं ज्ञानं सत्यं वासत्यमिति तत् कथं ज्ञायते ? इति प्रश्नस्योत्तरदानाय नैयायिकैः परतस्त्वं स्वीक्रियते। प्रवृत्तिसामर्थ्यादथवा सफलप्रवृत्त्या वा ज्ञानस्य प्रामाण्यनिश्चयो भवति। यदि कश्चिद्दूरतो जलं पश्यति, तर्हि तस्य ज्ञानं तावदेव भवतीदं जलमिति। परं तज्ज्ञानं प्रमाणं वा न वा इति तदा ज्ञायते यदा सः तत्र गत्वा जलं पिबति तदनन्तरं तस्य पिपासा शाम्यति। तया सफलप्रवृत्त्या प्रामाण्यं निश्चीयते। तस्यानुमानाकारश्चेत्थं भवति-*इदं ज्ञानं प्रमा, सफलप्रवृत्तिजनकत्वात्, यन्नैवं तन्नैवं यथा अप्रमा* इति। यत्र ह्यर्थस्य यथार्थोपलब्धिर्भवति, तत्रैव प्रवृत्तिरपि सफला भवति। तदभावे च प्रवृत्तिर्निष्फला भवति, अतस्तत्राप्रामाण्यमनुमीयते। एतावता प्रमाणत एवार्थप्रतिपत्तिर्जायते। तत्र प्रवृत्तिसाफल्ये प्रमाणं साधुः तदभावे चासाधु इति नियमः। अतः प्रवृत्तिसाफल्यात् प्रामाण्यमनुभूयते। कारणगतगुणैः प्रामाण्यम्, कारणगतदोषैरप्रामाण्यमित्याशयेन परत एव प्रामाण्यमङ्गीकृतं नैयायिकैः। यद्यपि प्रमाणानां प्रामाण्याप्रामाण्यसन्दर्भे स्वतस्त्वपरतस्त्वविषयकवैचारिकमतभेदोऽन्येषां दार्शनिकानामपि वर्तते तथापि अस्यालेखस्य न्यायवैशेषिकसम्मतप्रमाणमीमांसनप्रधानोद्देश्यत्वात् न हि सर्वेषां पौरस्त्यदार्शनिकानां प्रामाण्यसम्बद्धविचारा अत्र क्रोडीकृताः, ये च न्यायवैशेषिकदर्शनसम्मतप्रमाणसंबद्धा विचारास्त एव प्राधान्येन मीमांसिताः।

**निष्कर्षः**

न्यायवैशेषिकदर्शनप्रतिपादितप्रमाणानि वस्तुतत्त्वज्ञानस्य मूलाधाररूपेण प्रतिष्ठितानि सन्ति। यथार्थज्ञानस्य प्रधानं साधनं प्रमाणमिति नात्र सन्देहः। प्रमातृ-प्रमेय-प्रमिति-प्रमाणानां परस्परसंबन्धेनैव ज्ञानव्यवस्था सिद्ध्यति। न्यायदर्शनेन प्रत्यक्षानुमानोपमानशब्दाख्यानि चत्वारि प्रमाणानि प्रतिपाद्य प्रमाणप्राधान्यमेतद्दर्शनमिति तद्वैशिष्ट्यं प्रकटितम्। वैशेषिकदर्शने तु प्रत्यक्षानुमानप्रमाणयोः शब्दस्यान्तर्भावं विधाय प्रमाणापेक्षया पदार्थप्रधानत्वमस्य दर्शनस्येति सूचितम्। एवंविधभेद उभयोर्दर्शनयोः प्रमाणपदार्थविवेचनसन्दर्भे प्रक्रियाभेदं सूचयति।

न्यायवैशेषिकाचार्यैः प्रत्यक्षप्रमाणसन्दर्भे इन्द्रियार्थसन्निकर्षजन्यत्वम्, सन्निकर्षस्य षड्विधभेदाः, लौकिकालौकिकप्रत्यक्षभेदाः, निर्विकल्पक-सविकल्पकभेदश्च सूक्ष्मतया विश्लेषिताः। एतेन ज्ञानस्योत्पत्तिक्रमस्तथा विषयग्रहणविधिश्च स्पष्टो भवति। अनुमानप्रमाणे व्याप्तिज्ञानस्य, परामर्शस्य, पक्षसाध्यहेतुदृष्टान्तादीनां तद्घटकीभूतानां तत्त्वानाञ्च निरूपणात् परोक्षपदार्थनिर्णयार्थं विधिर्बोधितः। परार्थानुमाने पञ्चावयवात्मकन्यायवाक्यप्रयोगः प्राच्यतर्कपरम्पराया वैशिष्ट्यं द्योतयति। उपमानप्रमाणेन संज्ञासंज्ञिसंबन्धज्ञानस्य व्यावहारिकोपयोगो दर्शितः। शब्दप्रमाणेन तु आप्तवाक्यस्य विश्वसनीयत्वम्, ततश्च वेदस्य पौरुषेयत्वमपि निदर्शितम्। एतेषां प्रमाणानामुपयोगः सम्यग्ज्ञानप्राप्तौ सम्भवति इति न्यायवैशेषिकानां दृढो विश्वासः। न्यायवैशेषिकदर्शनोक्तप्रमाणानामुपयोगः केवलं ज्ञानमीमांसायामेव न, अपि तु तत्त्वमीमांसान्तर्भूते पदार्थविचारे, मोक्षसाधनचिन्तने च समन्वेतीति स्पष्टमेव।

**सन्दर्भग्रन्थसूची**


अन्नंभट्टः (१९८५), *तर्कसंग्रहः,* (न्यायबोधिन्याः संस्कृत-हिन्दीकलाद्वयव्याख्यया पदकृत्यस्य हिन्दीटिप्पण्या चोपेतः, व्याख्याकारः आचार्यः केदारनाथत्रिपाठी), मोतिलाल वनारसीदासः।

उद्योतकरः (१९९७), *न्यायवार्तिकम्, (*सम्पादकः अनन्तलाल ठक्कुरः), भारतीयदार्शनिकानुसन्धानपरिषद्।

उपाध्याय, गङ्गेशः (१९९०), *तत्त्वचिन्तामणिः* वाराणसी : चौखम्बा संस्कृत प्रतिष्ठानम्।

उदयनाचार्यः (१९६२), *न्यायकुसुमाञ्जलिः,* (हरिदासीव्याख्योपेतः, व्याख्याकारः हरिदासभट्टाचार्यः), चौखम्बाप्रकाशनम्।

कणादः (२०१०), *वैशेषिकदर्शनम्* (विद्योदयभाष्य-सहितम्), व्याख्याता : उदयवीर शास्त्री, विजयकुमार गोविन्दराम हासानन्द।

प्रशस्तपादाचार्यः (१९९७), *प्रशस्तपादभाष्यम्,* (श्रीधराचार्यकृतन्यायकन्दलीयुतम्) सम्पादको श्रीदुर्गानाथ झा, द्वितीयं संस्करणम्, सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

..., (२०७८), *प्रशस्तपादभाष्यम्,* नेपाली अनुवाद तथा तात्पर्यचन्द्रिका व्याख्यासमेत, (अनुवादकः व्याख्याता च - केशवशरण अर्यालः), नेपाल प्रज्ञान प्रतिष्ठान।

फणिभूषणः, तर्कवागीशः (१९६६), *न्यायपरिचयः,* (हिन्दीरूपान्तर), चौखम्बा विद्याभवन।

भट्टः, जयन्तः(१९८३), *न्यायमञ्जरी,* (सम्पादकः के. एस्. वरदाचार्यः), प्राच्यविद्यासंशोधनालयः।

..., (२०३९), *न्यायमञ्जरी*, श्रीचक्रधरविरचिताग्रन्थिभङ्गव्याख्यायुता (सम्पादकः श्रीगौरीनाथ शास्त्री), सम्पूर्णानन्द संस्कृतविश्वविद्यालयः।

भट्टः विश्वनाथः (२००३*), न्यायसिद्धान्तमुक्तावली,* (विलासिनीसंस्कृतहिन्दीव्याख्याद्वयोपेताः, व्याख्याकारः पं.ज्वालाप्रसादगौडः, संपादकः पं. श्रीढुण्डीराजशास्त्री,), चौखम्बासंस्कृतप्रतिष्ठानम्।

..., (२०६८), *न्यायसिद्धान्तमुक्तावली,* किरणावलीसहिता, कृष्णवल्लभाचार्यः (व्या.), चौखम्वासंस्कृतसंस्थानम्।

भासर्वज्ञः (१९६८), *न्यायसारः*, (संपादकः स्वामी योगीन्द्रानन्दः), षड्दर्शनप्रकाशनप्रतिष्ठानम्।

मिश्र, वाचस्पतिः (१९९६), *तात्पर्यटीका* (सम्पादकः अनन्तलाल ठक्कुरः), भारतीयदार्शनिकानुसन्धानपरिषद्।

मिश्रः, केशवः (२००३), *तर्कभाषा,* हिन्दीव्याख्योपेता, व्या.गजानन शास्त्री मुसलगाँवकर, चौखम्बा सुरभारती प्रकाशनम्।

व्योमशिवाचार्यः (१९८३), *व्योमवती* (द्वितीयो भागः), सम्पूर्णानन्द संस्कृत विश्वविद्यालय।

वल्लभाचार्यः (१९९१), *न्यायलीलावती,* (संपादकः हरिहरशास्त्री), चौखम्बा संस्कृत सिरिज।

वात्स्यायनः (१९९८), *न्यायभाष्यम्,* (प्रसन्नपदाव्याख्यासहितम्, व्याख्याकारः सुदर्शनाचार्यः), अभिनवसंस्करणम् बौद्धभारती।